द्विधा भूता प्रतिष्ठिता"। तथा "सा सन्ध्या कर्म विप्राणामहोरात्रकृतस्य तु। पापापनुत्तये यस्मात् तस्मान्नित्यं समाचरेत्" यमः "सन्ध्यामुपासते ये तु सततं संशितव्रताः। विधूतपापास्ते यान्ति ब्रह्मलोकमनामयम्"। शातातपः "अनृतं मद्यगन्धञ्च दिवामैथुनमेव च। पुनाति वृषलस्यान्नं बहिः सन्ध्या ह्युपासिता"। याज्ञवल्क्यः "निशायां वा दिवा वापि यदज्ञानकृतं भवेत्। त्रिकालसन्ध्याकरणात् तत्सर्वं विप्रणश्यति"। देवलः "सायं प्रातः सदा सन्ध्यामुपासीत शुचिर्बहिः"। विष्णु पु० "सर्वकालमुपस्थानं सन्ध्यायाः पार्थिवेष्यते। अन्यत्र सूतकाशौचविभ्रमातुरभीतितः"। योगियाज्ञवल्क्यः "सर्वावस्थोऽपि यो विप्रः सन्ध्योपासनतत्परः। ब्राह्मण्यान्न स हीयेत अन्यजन्मगतोऽपि सन्। सन्ध्या तूपासिता येन तेन विष्णुरुपासितः। दीर्घमायुः स विन्देत सर्वपापैः प्रमुच्यते"। तथा "सायं प्रातस्तु यः सन्ध्यां सक्चां प्रयुपासिते। जप्त्वैव पावनीं देवीं सावित्रीं लोकमातरम्। स तया पावितो देव्या ब्राह्मणो धूतकिल्विषः। न सीदेत् प्रतिगृह्णानोऽपि पृथ्वीं ससागराम्"। अग्निपुराणे मुनय ऊचुः "कथं मुने! दिवं याति ब्राह्मणो कृतकिल्विषः। अनग्निको हि नो ब्रूहि यदुक्तं वह्निना पुरा" सूत उवाच "सायं प्रातश्च यः सन्ध्यामुपास्तेऽच्युतमानसः। जपते पावनीं देवीं गायत्रीं वेदमातरम्। तया स भावितो देव्या ब्राह्मणः धूतकिल्विषः। न सीदेत् प्रतिगृह्णानः पृथिवीञ्च ससागराम्। ये चान्ये दारुणाः केचिद्ग्रहाः सूर्य्यादयो दिवि। ते चास्य सौम्यतां यान्ति शिवाः शिवतरास्तथा। यत्र तत्र गतञ्चैनं दारुणाः पिशिताशनाः। घोररूपा महाकायाः प्रभवन्ति न राक्षसाः। यावन्तश्च पृथिव्यां हि चीर्णवेदव्रता द्विजाः। अचीर्णव्रतवेदा वा विकर्मपथमाश्रिताः। तेषान्तु पावनार्थाय गायत्री नित्यमेव हि। द्वे सन्ध्ये ह्युपतिष्ठेत तदन्वयं महाव्रतम्"। तथा "द्वे सन्ध्ये ह्युपतिष्ठेत गायत्रीं प्रयतः शुचिः। यस्तस्य दुष्कृति नास्ति पूर्वतः परतोऽपि वा। एवं किल्विषयुक्तो हि विनिर्दहति पातकम्। उभे सन्ध्ये ह्युपासीत तस्मान्नित्यं द्विजोत्तमः"। तथा "सन्ध्या येन न विज्ञाता सन्ध्या नैवाप्युपासिता। जीवन्नेव भवेत् शूद्रो मृतः श्वा चाभिजायते"। मनुः "न तिष्ठति तु यः पूर्वां नोपास्ते यश्च पश्चिमाम्। स साधुभिर्बहिष्कार्य्यः सर्वस्मात् द्विजकर्मणः"। व्यासः "बहिः सन्ध्या दशगुणा गोष्ठप्रस्रवणादिषु। खाते तीर्थे दशगुणा साहस्री जाह्नवीजले"। बहिरिति अनाच्छादितस्थाने प्राङ्गणादौ। शातातपः "गृहेषु प्राकृती सन्ध्या गोष्ठे शतगुणा स्मृता। नदीषु शतसाहस्रा अनन्ता शिवसन्निधौ"। गृहेषु गृहवीथ्यादौ। योगियाज्ञवल्क्यः "सन्धौ सन्ध्यामुपासीत नास्तगे नोद्गते रवौ। सन्ध्यात्रयन्तु कर्त्तव्यं द्विजेनात्मविदा सदा"। संवर्त्तः "प्रातःसन्ध्यां सनक्षत्रामुपासीत यथाविधि। सादित्यां पश्चिमां सन्ध्यामर्द्धास्तमितभास्कराम्"। नरसिंहपुराणे "पूर्वां सन्ध्यां सनक्षत्रामुपक्रम्य यथाविधि। गायत्रीमभ्यसेत्तावद्यावदादित्यदर्शनम्"। मनुः "ऋषयो दीर्घसन्ध्यत्वात् दीर्घमायुरवाप्नुयुः। पूजां यशश्च कीर्त्तिञ्च ब्रह्मवर्चसमेव च। उपास्ते यस्तु नो सन्ध्यां ब्राह्मणो हि विशेषतः। सजीवन्नेव शूद्रः स्यान्मृतःश्वा चाभिधीयते"। तथा "सन्ध्याहीनोऽशुचिर्नित्यमनर्हः सर्वकर्मसु। यदन्यत् कुरुते किञ्चित् न तस्य फलभाग्भवेत्"। यमः "अनागतान्तु ये पूर्वामतीतां चापि पश्चिमाम्। ये विप्रा नानुतिष्ठन्ति सन्ध्यां ते वृषलाः स्मृताः"। छन्दोगपरिशिष्टे कात्यायनः "सन्ध्यां नोपास्य चाकर्त्ता स्नानदानस्य यः सदा। तं दोषा नोपसर्पन्ति वैनतेयमिवोरगाः" तथा "एतत् सन्ध्यात्रयं प्रोक्तं ब्राह्मण्यं यदधिष्ठितम्। यस्य नास्त्यादरस्तत्र न स ब्राह्मण उच्यते"। कूर्मपुराणे "न तिष्ठति तु यः पूर्वां नोपास्ते यस्तु पश्चिमाम्। स शूद्रेण समो लोके सर्वधर्मविवर्जितः"। मुख्यकाले सन्ध्यावन्दनाकरणे प्रायश्चित्तमाह। व्यासः "आदित्योऽभ्युदियाद्यस्य सन्ध्योपास्तिमकुर्वतः। स्नात्वा प्राणांस्त्रिराचम्य गायत्र्यष्टशतं जपेत्" पारिजाते तु "कालातिक्रमणे चैव चतुर्थ्यार्घ्यं प्रदापयेत्" इत्युक्तम्। मलमासतत्त्वे तु "कालातीता वृथा सन्ध्या वन्ध्यास्त्रीमैथुने यथा। गायत्रीं दशधा जप्त्वा पुनःसन्ध्यां समाचरेत्" काशीखण्डोक्तं प्रायश्चित्तान्तरमुक्तम्। अत्र यथाचारं व्यवस्था। सङ्गवपर्य्यन्तप्रातःसन्ध्याया गौणकालः आप्रदोषावसानं सायंसन्ध्यायाः इति मण्डनः। "उदयास्तमयादूर्द्ध्वं यावत् स्यात् घटिकात्रयम्। तावत् सन्ध्यामुपासीत प्रायश्चित्तमतःपरम्" इति स्कान्दे विशेष उक्तः। मध्याह्ने तु दक्षः "आध्यर्द्धयामादासायं सन्ध्या माध्याह्निकीष्यते। अर्घ्यप्रदानतः पूर्वमुदयास्तमयेऽपि वा। गायत्र्यष्टशतं जप्यं प्रायश्चित्तं द्विजा-